Regd. No. KA/SK/MYS-107/09-11
R.N.I. No. 20007/70
E-mail : sudharma.sanskritdaily@gmail.com
E-paper : http://sudharma.epapertoday.com
Phone : 0821-2442835 / 4287835

॥ श्रीः ॥
॥ धर्मो रक्षति रक्षितः ॥
ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।

स्थापना : १९७०

# सुधर्मा

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता

अद्वितीया संस्कृतदिनपत्रिका

सम्पादकः
के.वि. सम्पतुकुमार्

गौरवसम्पादकौ
विद्वान् एच्.वि. नागराजराव्
विद्वान् डा० टि.वि. सत्यनारायण

SUDHARMA, THE ONLY SANSKRIT DAILY, MYSORE- 570 004
(संस्थापक सम्पादकः-गीर्वाणवाणीभूषणं विद्यानिधिःपण्डित कळले नडादूरु वरदराजय्यङ्गार्यः)

ANNUAL SUBSCRIPTION
Rs. 300/- p.a.
(inclusive of postage)

सम्पुटः ४० | मैसूरुनगरम् | मूल्यम् : १.५० | सञ्चिका : १७१

स्वस्तिश्री विरोधिनामसंवत्सरे उत्तरायणे शिशिरर्तौ माघमासे कृष्णपक्षे द्वितीयायां मखानक्षत्रयुक्तः
०१ फेब्रवरि २०१० सोमवासरः

## सुभाषितम्

अरण्यं सारङ्गैर्गिरिकुहरगर्भाश्च हरिभिः
दिशो दिग्मातङ्गैः सलिलमुषितं पङ्कजवनैः ।
प्रियाचक्षुर्मध्यस्तनवदनसौन्दर्यविजितैः
सतां माने म्लाने मरणमथवा दूरगमनम् ॥

## भटाः तनुमध्याः भवेयुः

आरक्षकविभागे भटाः अधिकारिणश्च सम्यग् व्यायामं कृत्वा तनुमध्या भवेयुः, अपराधिनां ग्रहणे शीतका न भवेयुः इति जना निरीक्षन्ते । यदि भटास्तुन्दिलाः, कथं ते धावन्तमपराधिनं गृह्णीयुः? अधुना चोराः शीघ्रगामिनः। ते खलु विविधैर्वाहनैर्यान्ति ।

अत एव मैसूरुनगरस्य आरक्षकायुक्तः श्रीमान् सुनीलः अग्रवालः परिपत्रं प्रेषितवान् सर्वेभ्यः आरक्षकस्थानेभ्यः। प्रतिदिनं भटाः अधिकारिणश्च प्रातः शारीरं व्यायामं कुर्युः, तेषां मध्यस्य परिमाणम् एतावदेव भवेदिति। अतिकार्श्यं च नानुमन्यते तेन । अतिकृशगात्राः बलिष्ठाः न भवन्ति इति । एवं च भटानाम् आरोग्यपालनं नियमेन भवेदिति भावः ।

एष नियमः केवलं पुरुषाणां न, अपि तु स्त्रीणाम् अपि । आरक्षकदले स्त्रियोऽपि भवन्ति, ता अपि गात्रविषयेऽवधानं ददीरन्निति आयुक्तेन निगदितम् ।

अन्यत्रापि विभागे नियमोयं भवतु इति सर्वकारेण चिन्तनीयम्। तुन्दिभत्वमेव विविधानां रोगाणां मूलम् । यदि नियतपरिमाणः आहारो नियतकाले सेव्यते, तर्हि रोगाः स्वयं दूरे धावन्ति । मितभुक्, हितभुग् जनो देशस्य सम्पत् । आरोग्याधिकं भाग्यं लोके नास्ति । तद्वयं सर्वे रक्षेम ।

## विष्णुकप् क्रिकेट् स्पर्धा

मैसूरु - विख्यातःचलचित्रनट श्री विष्णुवर्धन् नाम्ना राज्यस्य क्रिकेट् स्पर्धा आगामि बुधवासरतः (१०-२-१०) तः १५-२-२०१० सोमवासर पर्यन्तंदोड्डकेरे क्रीडाङ्गणे प्रचलिष्यति । विषयमिमं मैसूरुमहानगर पालिकायाः सदस्यः तथा पाति फौण्डेषन् संस्थयाः अध्यक्षः श्री एम्.डि. पार्थसारथि समुपकल्पितायां पत्रिकागोष्ठ्यां पत्रकारान् उद्दिश्य क्रीडायाः सम्पूर्ण विवरणं दत्तवान्।

## हलदीरामसंस्थायाः स्वामी दण्डितः

कोलकत्ता - हलदीरामसंस्था खाद्यानी निष्पादने विक्रयणे च भारतवर्षे प्रसिद्धा। तस्याः स्वामी प्रभुशङ्करः अग्रवालः जीवावधि-कारागृहवासेन दण्डितः । तस्य चत्वारः अनुचरा अपि तथा न्यायालयेन दण्डिताः ।

अग्रवालस्य अनुचराः सत्यनारायणनामानं चायापण-स्वामिनं हन्तुं प्रयतितवन्तः। सत्यनारायणं समये द्रष्टुम् अशक्ताः ते तस्य भ्रातृजं प्रमोद-शर्माणम् आयुधैः ताडयित्वा व्रणितम् अकुर्वन् पञ्चोत्तरद्विसहस्रतमे वर्षे मार्चमासस्य त्रिंशेदिने (३०-३-२००५)। तदानीं तु अग्रवालः लण्डन् पत्तने आसीत् । यदा स लण्डन्पत्तनात् न्यवर्तत, तदा आरक्षकाः तं न्यगृह्णन् । ततःतस्यानुचरा अपि एकैकश आरक्षकवशीभूताः।

अग्रवालेन निर्मित्सितस्य महाभवनस्य विघ्नायते स्म सत्यनारायणेन प्रचाल्यमानं चायभवनम् । अतस्तं हन्तु अग्रवालेन योजना कृता ।

“मम संस्थायां सहस्रशः कर्मकराः सन्ति । यद्यहं कारागृहं गमिष्यामि, तर्हि तेषां स्थितिश्चिन्तनीया भविष्यति । अतो मयि करुणां दर्शनया” इति अग्रवालेन कृता प्रार्थना न्यायालयेन तिरस्कृता ।

## एते प्रशस्तिदानं विरुन्धन्ति

नवदिल्ली - पद्मप्रशस्तयोः भारत सर्वकारेण घोषिताः। तत्र प्रशस्तिं लब्धुं कति अर्हाः कति अनर्हाः इति न ज्ञायते । चित्रनटः सैफ् अलि खानोऽपि प्रशस्ति भागिनि सर्वकारेण घोषितः। सोऽनर्हः तस्मै पद्मश्रीप्रशस्तिर्न देया इति बीस्नोईमार्गानुयायिनो वदन्ति ।

गते गुरुवासरे एते जनाः सैफ् अलिक खानस्य प्रतिकृतिं जोधपुरे अदहन् ।

चित्रनटाः सैफ् अलि खान्, सल्मङ्खान् खान्, टाबूः, सोनाली बेन्द्रे, नीलम् इति एते सर्वेऽपि मृगायां कृत्वा द्वौ कृष्णमृगौ अघ्नन् । निषिद्धं मृगमरणं कृतवन्त इति एतेषां विषये अपराधव्यवहारो न्यायालये वर्तते । एतादृशाय मृगहन्त्रे प्रशस्तेः प्रदानं हास्यास्पदम् । अतः प्रशस्तिर्न देयास्मै इति बीस्नोई जनाः आगृह्णन्ति। एतदर्थं प्रतिभटनं कुर्मः इति तैः उक्तम् ।

बीस्नोईजनाः व्रतानां विंशतिं पालयन्ति । ते कदापि कमपि प्राणिनं न घ्नन्ति । अतः प्राणिनां हननं, विशेषतो मृगायां ते विरुन्धन्ति । सैफ अलिखानस्य माता शर्मिला टागोर् कांग्रेस्पक्षस्य वरिष्ठानां प्रीतिपात्री भूता। इदानीं कांग्रेस्पक्षीयः सर्वकारः किं करिष्यतीति द्रष्टव्यम्।

* लक्ष्मणपुरम् - अत्रत्ये कश्चन महानुभावः विषसर्पान् भक्ष्यति इति वार्ता ।

* बेङ्गळूरु - सुधर्मासंस्थापक सम्पदकस्य पण्डित वरदराज अय्यङ्गार्यस्य पौत्री चि.सौ. हेमा तथा चि. राघवन् सह विवाह महोत्सव कार्यक्रमः तृतीये दिनाङ्के बुधवासरे श्री मलोल कल्याण भवने प्रचलिष्यति ।

## भगवद्गीता कथमध्येतव्या?

मैसूरु - मम कस्याश्चित् समस्यायाः परिहारं भगवद्गीता ददातु इति जनो भगवद्गीताम् अधीते । किन्तु भगवद्गीता किं बोधयति इति जिज्ञासया सा अध्येतव्या इति आर्षविद्याकेन्द्र संचालकाः परमपूज्याः श्री चिद्रूपानन्द महास्वामिनः - अत्राब्रुवन्।

श्री दयानन्दमहास्वामिभिः विरचितस्य भगवद्गीतानिरूपणस्य कन्नडानुवादस्य लोकार्पण समारम्भे श्रीचरणाः भाषन्ते स्म । सुधर्मा संस्कृत दिनपत्रिकायाः गौरव सम्पादकः विद्वान् एच्.वि. नागराजराव् सभायाः अध्यक्षस्थानम् अलमकरोत् । मल्लिका पत्रिकायाः सम्पादकः श्रीमान् श्रीधरमूर्तिः मुख्यातिथिः आसीत् । अनुवादिका साध्वी वरदा चैतन्या वन्दनार्पणम् अकरोत् ।

* मैसूरु - प्रसारभारतीदूरदर्शन जालस्य निर्देशकस्य श्री महेशजोशी महोदस्य श्वः पत्रिकागोष्ठी प्रचलिष्यति।